# Amba Navaratnamalika 1

# અમ્બાનવરત્નમાલિકા ૧

## Document Information

Text title : Amba Navaratnamalika 1

File name : ambAnavaratnamAlikA1.itx

Category : devii, pArvatI, devI, nava

Location : doc_devii

Transliterated by : Sandhya Kunnatur

Proofread by : Sandhya Kunnatur

Latest update : September 3, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 3, 2025

*sanskritdocuments.org*

# અમ્બાનવરત્નમાલિકા ૧

શ્રીમત્ત્રિપુરામ્બિકાયૈ નમઃ ।
શ્રિતજનશિશિરાપાઙ્ગી શિવવામાઙ્ગી શિરીષમૃદુલાઙ્ગી ।
સઙ્ગીતસરસભઙ્ગી મુદિતકુરઙ્ગી કરોતુ મયિ કરુણામ્ ॥ ૧॥

બાલાં સુરુચિરફાલાં મુકુરકપોલાં વિચિત્રતરચૈલામ્ ।
લીલાહતાઘજાલાં સુલલિતમાલાં નમામિ શિવલોલામ્ ॥ ૨॥

અમ્બા સુગુણકદમ્બા પુલિનનિતમ્બા શિરોજલોલમ્બા ।
બિમ્બાધરા મૃગાક્ષી હિમરુચિબિમ્બાનના હિ મામવતાત્ ॥ ૩॥

કાલીમસુરકરાલીં કરધૃતખડ્ગાશુલૂનરિપુમૌલિમ્ ।
ધૂલીકૃતદિતિજાલીં દુરિતોદ્ધૂલીકૃતે શ્રિતોઽસ્મ્યનિશમ્ ॥ ૪॥

ભદ્રાં સુજનસુભદ્રામમૃતસમુદ્રાન્તરીપકૃતભદ્રામ્ ।
મુદ્રાં નતાભયકરીં દધતીં રુદ્રાઙ્ગનામહં વન્દે ॥ ૫॥

લલિતા શ્રિતજનફલિતામરતરુતુલિતા ભજત્કૃપાકલિતા ।
વલિતાપાઙ્ગનિપાતૈઃ કલયતુ કલ્યાણસન્તતિં મયિ તામ્ ॥ ૬॥

વિદ્યા તટિદિવ હૃદ્યા નખરુચિવિદ્યોતિતાત્મજનવેદ્યા ।
વેદ્યાગમૈશ્ચિદાદ્યા સુભૃશમવિદ્યાં લુનાતુ મમસદ્યઃ ॥ ૭॥

વાણીં કિસલયપાણીં પૃથુલશ્રોણીં નતામરશ્રેણીમ્ ।
વાણીજિતકલવાણીં ભુજગસુવેણીં નમામિ શુકપાણીમ્ ॥ ૮॥

માયાં સુરુચિરકાયાં સુગુણનિકાયાં સુરાસુરોદ્ધ્યેયામ્ ।
ધ્યેયાં યોગિભિરનિશં જગદભિધેયાં નમામિ શિવજાયામ્ ॥ ૯॥

નવરત્નમાલિકાખ્યામેતામાર્યામુદારસવિશેષામ્ ।
ગુરુરાજસુકૃતિરચિતાં દયયા સાઙ્ગીકરોતુ નિજહૃદયે ॥ ૧૦॥

ઇતિ અમ્બાનવરત્નમાલિકા (૧) સમ્પૂર્ણા ।

શ્રીમદ્ભિરણણયાચાર્યૈઃ વિરચિતા

Encoded and proofread by Sandhya Kunnatur

*Amba Navaratnamalika 1*
pdf was typeset on September 3, 2025

Please send corrections to *sanskrit@cheerful.com*